# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ५०

स तु राक्षसशार्दूलो निद्रामदसमाकुलः ।
राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः ॥ १॥

राक्षसानां सहस्रैश्च वृतः परमदुर्जयः ।
गृहेभ्यः पुष्पवर्षेण कार्यमाणस्तदा ययौ ॥ २॥

स हेमजालविततं भानुभास्वरदर्शनम् ।
ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम् ॥ ३॥

स तत्तदा सूर्य इवाभ्रजालं
प्रविश्य रक्षोऽधिपतेर्निवेशनम् ।
ददर्श दूरेऽग्रजमासनस्थं
स्वयम्भुवं शक्र इवासनस्थम् ॥ ४॥

सोऽभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च ।
ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम् ॥ ५॥

अथ दृष्ट्वा दशग्रीवः कुम्भकर्णमुपस्थितम् ।
तूर्णमुत्थाय संहृष्टः संनिकर्षमुपानयत् ॥ ६॥

अथासीनस्य पर्यङ्के कुम्भकर्णो महाबलः ।
भ्रातुर्ववन्दे चरणां किं कृत्यमिति चाब्रवीत् ।
उत्पत्य चैनं मुदितो रावणः परिषस्वजे ॥ ७॥

स भ्रात्रा सम्परिष्वक्तो यथावच्चाभिनन्दितः ।
कुम्भकर्णः शुभं दिव्यं प्रतिपेदे वरासनम् ॥ ८॥

स तदासनमाश्रित्य कुम्भकर्णो महाबलः ।
संरक्तनयनः कोपाद्रावणं वाक्यमब्रवीत् ॥ ९॥

किमर्थमहमादृत्य त्वया राजन्प्रबोधितः ।
शंस कस्माद्भयं तेऽस्ति कोऽद्य प्रेतो भविष्यति ॥ १०॥

भ्रातरं रावणः क्रुद्धं कुम्भकर्णमवस्थितम् ।
ईषत्तु परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत् ॥ ११॥

अद्य ते सुमहान्कालः शयानस्य महाबल ।
सुखितस्त्वं न जानीषे मम रामकृतं भयम् ॥ १२॥

एष दाशरथी रामः सुग्रीवसहितो बली ।
समुद्रं सबलस्तीर्त्वा मूलं नः परिकृन्तति ॥ १३॥

हन्त पश्यस्व लङ्काया वनान्युपवनानि च ।
सेतुना सुखमागम्य वानरैकार्णवं कृतम् ॥ १४॥

ये राक्षसा मुख्यतमा हतास्ते वानरैर्युधि ।
वानराणां क्षयं युद्धे न पश्यामि कदा चन ॥ १५॥

सर्वक्षपितकोशं च स त्वमभ्यवपद्य माम् ।
त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम् ॥ १६॥

भ्रातुरर्थे महाबाहो कुरु कर्म सुदुष्करम् ।
मयैवं नोक्तपूर्वो हि कश्चिद्भ्रातः परन्तप ।
त्वय्यस्ति मम च स्नेहः परा सम्भावना च मे ॥ १७॥

देवासुरविमर्देषु बहुशो राक्षसर्षभ ।
त्वया देवाः प्रतिव्यूह्य निर्जिताश्चासुरा युधि ।
न हि ते सर्वभूतेषु दृश्यते सदृशो बली ॥ १८॥

कुरुष्व मे प्रियहितमेतदुत्तमं
यथाप्रियं प्रियरणबान्धवप्रिय ।
स्वतेजसा विधम सपत्नवाहिनीं
शरद्घनं पवन इवोद्यतो महान् ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com